International Journal of Sanskrit Research 2020; 6(6): 123-125

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 123-125
© 2020 IJSR
www.anantaajournal.com
Received: 08-08-2020
Accepted: 16-09-2020

**दयाम्बर शबर**
शोधछात्रः, संस्कृत विभागः
पुदुचेरी विश्वविद्यालयः, पुदुचेरी, पुदुचेरी, भारत

**डा० श्रीकान्त परिडा**
शोधछात्रः, संस्कृत विभागः
पुदुचेरी विश्वविद्यालयः, पुदुचेरी, पुदुचेरी, भारत

**Corresponding Author:**
**दयाम्बर शबर**
शोधछात्रः, संस्कृत विभागः
पुदुचेरी विश्वविद्यालयः, पुदुचेरी, पुदुचेरी, भारत

# भक्तेर्भेदविवेचनम्

**दयाम्बर शबर, डा० श्रीकान्त परिडा**

**DOI:** https://doi.org/10.22271/23947519.2020.v6.i6c.1251

**सारंश**

अखण्डानन्ददायकं जगत्कारणं नित्यं त्रिकालविनाशी शाश्वतश्च भक्तिः। ईश्वरं प्रति अनन्यप्रेमः परमानुरागः एव भक्तिः। भगवदानन्दरूपा इयं भक्तिस्तावद् गौणी पराभेदेन द्विविधा। गौणी पुनः द्विधा- वैधी रागात्मिका च। वैधी अपि पुनः श्रवणादिभेदेन नवधा। रागात्मिका हास्यादिरसभेदेन चतुर्दशधा विभज्यत्। तथा च वैधी-रागात्मिका पराभेदाद् भवति भक्तिस्त्रिविधा।

**मुख्यशब्दः** - भक्तिरसः, भक्तिः, गौणीभक्तिः पराभक्तिः, भक्तिमार्गः, श्रीमद्भागवतम्

## प्रस्थावना

भगवदानन्दचर्वणमेव भक्तिः। भगवत्धर्म अर्थात् भगवद्गुणश्रवणादिमाध्यमेन द्रवीभूतचित्तस्य सर्वेश्वरभगवति विषये धारावाहिकप्राप्तवृत्तिं यथा तैलधारावतविच्छिन्नरूपेण भगवदाकाराकारितः भक्तिरूपेण मन्यते। यदा सर्वस्मात् प्रपञ्चविषयात् मनसं निगृहीतं कृत्वा केवलम् ईश्वरे नियोजयति अपि च साधकं यदा कोवलम् ईश्वरचिन्तनं विहाय अन्यदपि विषये चिन्तनं न करोति, तदा ईश्वरस्य अनन्यप्रेमस्य नाम भक्तिः। अर्थात् इश्वरं प्रति सम्पूर्णानुरागस्य नाम भक्तिः।

भगवदानन्दरूपाभक्तिस्तावद् गौणी पराभेदेन द्विविधा। गौणी पुनः द्विधा- वैधी रागात्मिका च। वैधी अपि पुनः श्रवणादिभेदेन नवधा। रागात्मिका हास्यादिरसभेदेन चतुर्दशधा विभज्यत्। तथा च वैधी-रागात्मिका पराभेदाद् भवति भक्तिस्त्रिविधा। पूर्वं वैधी ततो रागात्मिका तदनन्तरं च परा भक्तिः जायते।

"भक्त्याभजनोपसंहाराद्गौण्यापरायैतद्धेतुत्त्वात्"[1]

भगवत्भजनं भगवत्प्रतिमादिनां सेवादि गौणभक्तिः उच्यते। भक्तिमार्गारोढ साधकस्य विविधविघ्नस्य सम्भावनां जायते। तत् सर्वविधविघ्नं गौणभक्तिरूपसाधनेन विनश्यति। तथा च साधकः क्रमशः भक्तिमार्गे उन्नतं भूत्वा पराभक्तेः अधिकारी भवति। इदं भक्तस्य सहायकमेव। तदर्थं एतदाचार्याः भक्तेः भित्तिरूपेण वर्ण्यते। प्रथमाधिकार्य्यां कृते गौणभक्तिः एव उपयुक्ति भवति। तद् विहाय सर्वप्रकारोपासकानयं गौणभक्तिः एव सहायकरूपेण क्रमशः भक्तिराज्ये प्रवेशयित्वा मुक्तिपदस्याधिकारं ददाति। यथा 'क' - आदिवर्णाः एव आदिरूपं भूत्वा विद्यार्थीगणानां प्राप्तये प्रथमसहायकं भवति। विद्यार्थीगणाः प्रथमे वर्णम्, वर्णात् शब्दं, शब्दात् शब्दार्थं, शब्दार्थात् भाववोधं, तत्पश्चात् वेदज्ञानस्य प्रप्तिमाध्यमेन परमकल्याणं प्राप्नुवन्ति। तथैव गौणभक्तिः भक्तस्य प्रथमं तथा प्रधानमवलन्बलं भवति। यथा समाधिरूपयोगस्य प्राप्त्यार्थं आष्टाङ्गयोगाः सहायकाः भवन्ति तथैव पराभक्तिप्राप्तये गोणभक्तिसाधनस्याज्ञानमाचार्य्याः ददति। गुरुवाक्ये शास्त्रवाक्ये च दृढश्रद्धायुक्तं भूत्वा ईश्वरप्राप्तये तस्य महिमादयादिनां च स्मरणं कृत्वा साधकस्य हृदये यः प्रथमावस्थायुक्तः भगवद्भक्तिः उदेति, स एव गौणभक्तिः इत्युच्यते। उपासनायाः योगादिना च गौणभक्तिः उन्नतिं प्राप्नोति। पुनः चित्तस्य एकाग्रता, मनवृत्तेश्च पवित्रता स्थापिते सति साधकाः सविकल्पकसमाधिः प्राप्नुवन्ति। योगशास्त्रे प्रमाणमस्ति यत्, यदा साधनेन सत्त्व-रज-तमगुणानां चञ्चलता रूपस्य क्षिप्त-विक्षिप्त-मूढवृत्तेः अकाग्रभूत्वा निरुद्धावस्थाः प्राप्तम् भवति तदैव समाधेः उदयं भवति। भक्तिसाधनेन स्वतः एव अन्तकरणं निर्मलं भवति। तथा च यदा अन्तःकरणं चञ्चलतारहितं भवति तदा समाधिरपि प्राप्यते अस्मिन् प्रसङ्गे किमपि सन्देहं नास्ति। गौणभक्तेः साधनं तथानुरागस्यार्थं भवति नमस्कार-नामकीर्तनादयश्च। भगवतः स्तुतिः, तस्य चरणे वावम्बारं प्रणामम्, तस्य नामगुणसंकीर्तनम्, तस्य लीलाभूमितीर्थानां दर्शनम्, तस्य मूर्तेः अङ्गराग-नैवद्य-आरत्यादिनां पूजनम् इत्यादीनि सर्वाणि गौणभक्तेः अन्तर्गतानि। किञ्च गौणभक्तिना अनुरगमोत्तरोत्तरं वर्ध्यते। अनेन प्रकारेण साधकः क्रमशः भगवत्कृपावशात् पराभक्तेः अधिकारी भवति। शाण्डिल्यभक्तिसूत्रे महर्षिणा गौणभक्तेः लक्षणं तथा च साधनस्याङ्गम् उक्तम् यथा- "रागार्थैप्रकीर्तिसहाचर्य्याच्चेतरेषाम्" । श्रीमद्भगवद्गीतायामप्यस्य उपासनाकाण्डरूपगौणभक्तेः वर्णनमस्ति। सूत्रकारः महर्षिशाण्डिल्यः यथा- "अन्तरालेतुशेषाः स्युरूपास्यादौचकाण्डत्त्वात्" । इति पूर्वविचारस्याप्तप्रमाणं ददाति। श्रीमद्भगवद्गीतायां नवमाध्याये श्रीभगवान् स्वमुखादेव गौणभक्तिरूपस्य भक्तिसाधनस्य वर्णनं क्रियते।

सततं कीर्तयंतोमां यतं तश्च दृढप्रताः।
नमस्यान्तश्च मां भक्त्या नित्ययुक्ता उपासते॥
ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते।
एगत्वेन पृथक्त्वेन वहुधा विश्वतोमुखम् ॥

अर्थात् कश्चत् भक्तः मम गुणकीर्तनं कृत्वा, कश्चित् दृढनियमतपस्यां कृत्वा, कश्चित् भक्तिपूर्वकं मां प्रणामं कृत्वा, सर्वदा एकाग्रचित्ते ध्यानं कृत्वा, कश्चित् ज्ञानयज्ञेन ममोपासनं कृत्वा, कश्चिदहङ्काररहितं भूत्वा दासरूपेण मां पूज्यते। अपि च कश्चिद् भक्तः मां सर्वात्मकरूपेण ज्ञात्वा मामुपास्यते।
श्रद्धापूर्वकं भगवत्सेवा अथवा भगवन्नामकीर्तनादिरूपगौणभक्तेः साधनं कुर्वन् साधकस्यान्तकरणवृत्तिः पवित्रः भवति। अस्यमन्तकरणशुद्धिः एव गौणभक्तेः फलम्। यदान्तकरणं शुद्धं भवति। तद् पश्चादेव साधकः निर्मलपाभक्तेः अधिकारी भवितुं शक्नोति। यथा- कञ्चुकीभृङ्गः तैलपाईकीटं धृत्वा तस्य ध्यानेन क्रमशः तस्य रूपं धारयति तथैव साधकः गौणभक्तिसाधनेन भगवन्नामसंकीर्तनस्याथवा भगवद्गुणस्य मननं कुर्वन् क्रमशः शुद्धान्तकरणं भूत्वा भगवद्दर्शनेन मुक्तिपदं प्राप्यते। अमृतरूपस्यार्थात् मुक्तिरूपस्य पराभक्तेः प्राप्त्यर्थं गौणभक्तिमेव प्रधानं सहायकं मत्वा कश्चिदाचार्य्यः कथयति यत्, यदा गौणभक्तिसहयोगेन पराभक्तिं प्राप्यते। तदा गौणभक्तिरेव भवति प्रधानम्। यथा संसारस्यादिकारणं बालकः ज्येष्ठापेक्षया अधिकतरप्रियरूपेण मन्यन्ते, तेव साधारणविचारानुसारेण कारणसम्बन्धात् गौणभक्तेरपि प्रशंसां करोति कश्चिदाचार्यः।
श्रीमद्भागवद्गीतायां भक्तिमार्गस्य वर्णनसमये श्रीभगवान् आर्तः जीज्ञासुः, अर्थार्थी, ज्ञानी इति चत्वारनामभेदेन भक्तिवर्णनं क्रियते, सूत्रकारः महर्षिः कथयति यत् एतेषु प्रकारचतुष्टयशक्तियोगेषु गौणभक्तेः भेदं परन्तु चतुर्थज्ञानीभक्तिः एव पराभक्तिः भवति। अस्य ज्ञानीभक्तेः वर्णनमुपरिक्तत्रीभिः भक्तिभिः सहालोचितत्त्व कोवलं

[1] शाण्डिल्यभक्तिसूत्रम् - ५६

गौणभक्तेः प्रशंसा एव क्रियते। आर्तभक्तः तमेव उच्यते। यः संङ्कटापन्नावस्थातः स्वयमुद्धारणार्थं श्रीभगवतः शराणापन्नं भवति। जिज्ञासुभक्तः सः एव भवति यः भगवत्तत्त्वस्याववोधनार्थं शास्त्रे गुरुवाक्ये च विश्वासं स्थापयित्वा भगवद्भक्तिं करोति। अपि चार्थार्थीभक्तः तमेव कथयति यः स्वस्य कामनायाः पुरणार्थं भगवति भक्तिं ज्ञाप्यते। अस्य तात्पर्यं यथा- सत्व-रजः-तमरूपगुणभेदेन गौणभक्तेः साधकानार्त- जिज्ञासु- अर्थार्थीरूपेण विभाजनं क्रियते। एतानतिरिच्यः यस्य ज्ञानीभक्तस्य नाम दृश्यते सः पराभक्तेः अधिकारी।

यदा वैधीभक्तिमनुतिष्ठोतो भक्तस्य हृदये भगवन्तं प्रत्येवंविधोऽपूर्वोऽनुराग उत्पद्यते योनाहर्दिवं भक्तो भगवद्भवसागरे निमग्नोऽमन्दमानन्दसन्दोहं लभते। तदानीं तस्य चोतसि तैलधारावदान्द अमृतसिञ्चनकोऽनवच्छिन्नो भक्तिरसप्रवाहो विजृम्भते। इयं दशैव रागात्मिका प्रोच्यते। दशायामस्यां भक्तस्य मनोमधुपः प्रभुपादपद्ममकरन्दरसास्वादनोन्मत्तः सर्वत्र प्रभुमेव पश्यन्नानन्दनिमग्नो निरन्तरं तिष्ठति। भक्तहृदयं संसारीकेभ्यो विषयेभ्यो विरक्तं सन्नहर्निशं भगवति लीनं भवति। एतत्परिपक्कदशायाः परिणाम एव पराभक्तिर्निगद्यते।

## निष्कर्ष

ईश्वरभक्तेः प्रधानभेदाः द्विविधाः साधनरूपसाध्यरूपश्च। साधनरूपस्यापरं नाम वैधिः, स नवधा। एवं च साध्यरूपस्यापरं नाम प्रेमाप्रेमलक्षणम् इति। तन्मध्ये सेवा भवति साधनरूपा तथा प्रेमः भवति साध्यरूपः। इयमेव भक्तेः सामान्य भेदाः।

## संन्दर्भ


1. सरस्वती, स्वामी अभयानन्द (२०११), शाण्डिल्यभक्तिसूत्रम्, श्री शौनक सुधा प्रकाशक समिति, लखनऊ
2. पाण्डेय, श्री जनार्दन शास्त्री (२०१५) श्री भगवद्भक्तिरसायन, चौखम्बा विद्याभवन, वारणासी
3. सरस्वती, स्वामी अखण्डानन्द (१९८७), भक्तिरहस्य, चन्द्र प्रिंटिंग प्रेस कालबादेवी, बम्बई.
4. स्वामी, ए.सी. भक्तिवेदान्त (१९८९), भक्तिरसामृतसिन्धु, भक्तिवेदान्त बुकट्रस्ट, बम्बई
5. श्री विष्णुपुरी (१८९०), भक्तिरत्नावली, वाराणसेय संस्कृतविश्वविद्यालयः, वाराणसी